# षष्ठः पाठः  युग्ममाला। (कण्ठस्थीकरणार्थम्)

संस्कृतसाहित्ये शब्दयुग्मानि प्रसिद्धानि । यथा - **यदा-तदा, यावत्-तावत्, यत्र-तत्र** । उदा. **यथा** राजा **तथा** प्रजा। शब्दयुग्मानाम् उपयोगेन श्लोकस्य वाक्यस्य वा सौन्दर्यं वर्धते ।

**वृत्तम्-वंशस्थम्**

यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः।
तथा चतुर्भिः पुरुषः परीक्ष्यते श्रुतेन शीलेन गुणेन कर्मणा।।१।। - वृद्धचाणक्यशतकात्

अन्वयः - **यथा** कनकं निघर्षण - छेदन - ताप-ताडनैः (इति) चतुर्भिः परीक्ष्यते, **तथा** पुरुषः श्रुतेन, शीलेन, गुणेन, कर्मणा (इति) चतुर्भिः परीक्ष्यते ।

**वृत्तम्-अनुष्टुप्**

यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ।।२।। - हितोपदेशात्

सन्धिविग्रहाः - १) नास्ति = न + अस्ति । २) श्लाघ्यस्तत्राल्पधीरपि = श्लाघ्यः + तत्र + अल्पधीः + अपि। ३) एरण्डोऽपि = एरण्डः + अपि ।

अन्वयः - **यत्र** विद्वज्जनः न अस्ति, **तत्र** अल्पधीः अपि श्लाघ्यः (भवति) । (यथा) निरस्तपादपे देशे एरण्डः अपि द्रुमायते ।

**वृत्तम्-शिखरिणी**

यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्धः समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः ।
यदा किञ्चित्किञ्चिद् बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ।।३।। - नीतिशतकात्

सन्धिविग्रहाः - १) किञ्चिज्ज्ञोऽहम् = किञ्चिज्ज्ञः + अहम् । २) सर्वज्ञोऽस्मीत्यभवदवलिप्तम् = सर्वज्ञः + अस्मि + इति + अभवत् + अवलिप्तम् । ३) किञ्चित्किञ्चिद् बुधजनसकाशादवगतम् = किञ्चित् + किञ्चित् + बुधजनसकाशात् + अवगतम् । ४) मूर्खोऽस्मीति = मूर्खः + अस्मि + इति ।

अन्वयः - **यदा** अहं किञ्चिज्ज्ञः (तदा) (अहं) द्विपः इव मदान्धः समभवम् । **तदा** मम मनः 'सर्वज्ञः अस्मि' इति अवलिप्तम् अभवत् । **यदा** बुधजनसकाशात् किञ्चित् किञ्चित् अवगतम् **तदा** (अहं) मूर्खः अस्मि (इति ज्ञात्वा) मे मदः ज्वरः इव व्यपगतः ।

**वृत्तम्-अनुष्टुप्**

तावद् भयाद्धि भेतव्यं यावद् भयमनागतम्।
आगतं तु भयं वीक्ष्य नरः कुर्याद् यथोचितम्।।४।। - पञ्चतन्त्रात्

सन्धिविग्रहाः - १) भयाद्धि = भयात् + हि । २) भयमनागतम् = भयम् + अनागतम् ।

अन्वयः - **यावत्** भयम् अनागतं **तावत्** हि भयात् भेतव्यम् । (तथापि) आगतं तु भयं वीक्ष्य नरः यथोचितं कुर्यात् ।

**वृत्तम्-अनुष्टुप्**

उत्तमो नातिवक्ता स्यादधमो बहु भाषते।
सुवर्णे न ध्वनिस्तादृग्यादृक्कांस्ये प्रजायते।।५।।

सन्धिविग्रहाः - १) उत्तमो नातिवक्ता = उत्तमः + न + अतिवक्ता । २) स्यादधमो बहु = स्यात् + अधमः + बहु । ३) ध्वनिस्तादृग्यादृक्कांस्ये = ध्वनिः + तादृक् + यादृक् + कांस्ये ।

अन्वयः - उत्तमः अतिवक्ता न स्यात्, अधमः बहु भाषते । **यादृक्** कांस्ये (ध्वनिः) प्रजायते **तादृक्** सुवर्णे ध्वनिः न (प्रजायते) ।

वृत्तम्–अनुष्टुप्

यादृशं वपते बीजं क्षेत्रमासाद्य कर्षकः ।
सुकृते दुष्कृते वाऽपि तादृशं लभते फलम् ।।६।।

सन्धिविग्रहाः – १) क्षेत्रमासाद्य = क्षेत्रम् + आसाद्य । २) वाऽपि = वा + अपि ।

अन्वयः – कर्षकः क्षेत्रम् आसाद्य **यादृशं** बीजं वपते (**तादृशं** फलं लभते) । (तथैव मनुष्यः) सुकृते वा दुष्कृते वा अपि **तादृशं** (इष्टम् अनिष्टं वा) फलं लभते ।

## भाषाभ्यासः

### श्लोकः १

**१. पूर्णवाक्येन उत्तरत ।**

अ) कनकपरीक्षा कथं भवति ?

आ) पुरुषपरीक्षा कथं भवति ?

**२. जालरेखाचित्रं पूरयत ।**

अ)




आ)




**३. माध्यमभाषया उत्तरत ।**

'यथा चतुर्भिः' इति श्लोकस्य स्पष्टीकरणं लिखत ।

**४. अमरकोषात् शब्दं प्रयुज्य वाक्यं पुनर्लिखत ।**

जनैः <u>कनकं</u> परीक्ष्यते ।

### श्लोकः २.

**१. पूर्णवाक्येन उत्तरत ।**

अ) अल्पधीः कुत्र श्लाघ्यः भवति ?

आ) एरण्डः कुत्र द्रुमायते ?

**२. सन्धि–विग्रहं कुरुत ।**

अ) श्लाघ्यस्तत्र आ) अल्पधीरपि ।

**३. अमरकोषात् शब्दं प्रयुज्य वाक्यं पुनर्लिखत ।**

यत्र एकः अपि <u>पादपः</u> नास्ति तत्र एरण्डः द्रुमायते ।

### श्लोकः ३.

**१. पूर्णवाक्येन उत्तरत ।**

अ) मनुष्यः द्विप इव मदान्धः कदा भवति ?

आ) 'मूर्खः अस्मि' इति मनुष्येण कुतः अवगतम् ?

**२. सन्धिविग्रहं कुरुत ।**

(अ) किञ्चिज्ज्ञोऽहम् (आ) अभवदवलिप्तम् ।

**३. माध्यमभाषया उत्तरत ।**

कदा मदः व्यपगच्छति ?

### श्लोक : ४.

**१. पूर्णवाक्येन उत्तरत ।**

अ) आगतं भयं वीक्ष्य नरः किं कुर्यात् ?

**२. सन्धिविग्रहं कुरुत ।**

भयाद्धि ।

### श्लोकः ५.

**१. पूर्णवाक्येन उत्तरत**

अ) कः बहु भाषते ?

**२. सन्धिविग्रहं कुरुत ।**

अ) स्यादधमः ।

### श्लोकः ६.

**१. पूर्णवाक्येन उत्तरत ।**

अ) कर्षकः कीदृशं फलं लभते ?

**२. सन्धिविग्रहं कुरुत ।**

(अ) क्षेत्रमासाद्य (आ) वाऽपि ।

**३. माध्यमभाषया उत्तरत ।**

मनुष्यः स्वकर्मणः कीदृशं फलं लभते ?

**४. अमरकोषात् शब्दं प्रयुज्य वाक्यं पुनर्लिखत ।**

<u>कर्षकः</u> बीजं वपते ।

**१) समानार्थकशब्दान् लिखत ।**

कनकम्, विद्वान्, पादपः, अधमः ।

**२) विरुद्धार्थकशब्दान् लिखत ।**

गुणः, विद्वान्, उत्तमः, सुकृतम् ।

**३) चतुर्थपदं लिखत ।**

अ) मनः - चेतः :: अवगतम् - ______

आ) बुधजनः - ज्ञानी :: मूर्खः - ______

इ) नरः - मनुष्यः :: उचितम् - ______

ई) वीक्ष्य - दृष्ट्वा :: भयम् - ______

**४) समानार्थकशब्दानां मेलनं कुरुत ।** ।

| | |
|---|---|
| सुवर्णम् | श्रेष्ठः |
| उत्तमः | व्याप्तम् |
| अवलिप्तम् | शब्दः |
| ध्वनिः | हेम |

**५) उचितं शब्दयुग्मं योजयत । (यत्र-तत्र, यदि-तर्हि, यदा-तदा, यथा-तथा)**

अ) ______ अध्यापकः न आगच्छति ______ छात्राः स्वाध्यायं कुर्वन्ति ।

आ) ______ धूमः ______ वह्निः ।

इ) ______ आकाशे मेघाः गर्जन्ति ______ मयूरः नृत्यति ।

ई) ______ विचारः ______ वर्तनम् ।

उ) ______ सूर्यः उदेति ______ विश्वं प्रकाशमयं भवति ।

ऊ) ______ शर्करा ______ पिपीलिकाः ।

ए) सज्जनाः ______ वदन्ति ______ कुर्वन्ति ।

ऐ) ______ बालकः व्यायामं करिष्यति ______ सः सुदृढः भविष्यति ।

## क्रीडत-नन्दत

### पद्यक्रीडा

१. एकः गणः सुभाषितस्य एकं चरणं वदति । अपरः गणः श्लोकार्धं पूर्णं करोति ।

२. पद्ग्रहणम् - एकेनोक्तात् श्लोकार्धात् एकं पदं स्वीकृत्य अपरः गणः अन्यं श्लोकार्धं श्लोकपादं वा कथयति ।

### श्लोकान्त्याक्षरी

क्रीडकानां गणद्वयं भवेत् । आदौ प्रथमगणीयेषु अन्यतमः एकं श्लोकं वदेत् । तदा द्वितीयगणीयेषु अन्यतमः तादृशम् एकं श्लोकं वदेत्, यस्य च आरम्भः अन्यगणीयेन उक्तस्य श्लोकस्य अन्तिमेन अक्षरेण भवति ।

**- क्रीडावल्ली-पुस्तकात् ।**

733UZ7